ग्रं.नं.३५

संस्कृत - धर्मशास्त्र.
स्मृति. ~~पुराण~~

# गोदाननिर्णयचंद्रिका

३२ स्मृ. ~~८६~~ ९४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

# अथ गोंदा[illegible]चंद्रिकाप्रारंभः ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)




Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

# अथ श्रीगोदानिर्णयचंद्रिकानुक्रमणिकाप्रारंभः ॥

## श्रीमद्गोदायै नमः ॥


१ मंगलाचरणं
१ धर्मादिपुरुषार्थसेवनावश्यकत्वं
१ धर्मस्यपरमपुरुषार्थत्वनिर्णयः
१ धर्मेतीर्थयात्रायाःप्राधान्यं
१ तीर्थयात्राऽवश्यकत्वनिर्णयः
१ सामान्यतस्तीर्थप्रशंसा
२ तीर्थभेदाः
२ गोदाभागीरथ्योरेकत्वनिर्णयः
२ गोदोत्पत्तिकालनिर्णयः
३ गोदायास्त्रिदेवताकत्वनिर्णयः
३ गोदाप्रशंसावाक्यसंग्रहः
४ सिंहस्थेगोदायात्रादेरतिश्रेयस्कारित्वं
४ गोदायागंगापदवाच्यत्वनिर्णयः
४ यात्राधिकारिनिर्णयः
५ गृहस्थस्यसपत्नीकस्यैवाधिकारः
५ स्त्रियाःपत्यासहैवाधिकारः
५ विधवायाःपुत्राद्यनुमत्यैव
५ तीर्थफलतारतम्यनिरूपणं
५ यात्रायांपादगमनफलं
५ गोयानगमनफलं


" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3)




५ अग्निशकटगमनफलं
५ प्रासंगिकगमनफलं
५ तीर्थयात्रायांकालनिर्णयः
६ गोदायामस्तादेरपवादः
६ गमनागमनयोर्घृतश्राद्धं
६ उपवासाभावेप्रतिनिधयः
६ कार्पटीवेषादिविधिः
६ यात्रामध्येनियमादिनिरूपणं
७ मार्गेगमनस्नानादिविचारः
७ तीर्थसामीप्यप्राप्तौविधिः
८ तीर्थेप्रतिग्रहविचारः
८ तीर्थगर्भतीरक्षेत्रलक्षणनिर्णयः
८ तीर्थेमुंडननिर्णयः
९ त्र्यंबकेएवमुंडनमित्यस्यायुक्तत्वं
९ कुशावर्तस्यावांतरतीर्थत्वनिर्णयः
१२ नासिकत्र्यंबकयोःक्रमयात्राविचारः
१३ नासिकादौकृतमुंडनेनत्र्यंबकेमुंडनंनकार्यं
१३ दशमासानंतरंपुनर्मुंडनं
१४ जीवत्पितृकमुंडनविचारः
१४ साग्निकस्यमुंडननिर्णयः
१५ तीरवासिमुंडननिर्णयः
१५ वपनप्रकारः
१६ मुंडनाभावेद्विगुणव्रताद्याचरणम्
१६ निषिद्धकालेपितीर्थेवपनं
१६ नासिकत्र्यंबकक्रमयात्रामुख्या
१७ एकक्षेत्रयात्रामध्यमा
१७ क्षेत्रभिन्नगोदायात्रान्यूनफलका
१७ तीर्थेपातकस्यवज्रलेपसमत्वं


" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)


१८ तीर्थांगोपवासनिर्णयः
१८ तीर्थसामीप्यप्राप्तौकर्तव्यनिर्णयः
१८ अर्घ्यदाननिर्णयः
१८ सचैलस्नानं
१८ पूर्वोत्तरांगप्रायश्चित्तविचारः
१९ अशक्तौकृच्छ्रत्रयादि
२० भस्मगोमयादिस्नानं
२० ब्रह्मदंडविचारः
२० दशदानादिनिरूपणम्
२१ स्थलविशेषेस्नाननिषेधः
२१ रात्र्यादौस्नानादिनिर्णयः
२१ अन्योद्देशेनतीर्थेस्नानं
२१ तर्पणनिर्णयः
२२ तिलतर्पणनिषेधापवादः
२२ विधवातर्पणविचारः
२२ नदीनांरजोदोषनिर्णयः
२३ तीर्थश्राद्धं
२३ श्राद्धस्थलनिर्णयः
२३ भूमिस्वामिनेमूल्यदानं
२३ तीर्थश्राद्धेकालनिर्णयः
२३ निषिद्धकालेपिश्राद्धस्यकर्तव्यत्वनिर्णयः
२४ तीर्थश्राद्धेब्राह्मणविचारः
२५ तीर्थश्राद्धेवर्ज्यकर्मनिर्णयः
२५ तीर्थश्राद्धेविश्वेदेवनिर्णयः
२५ अन्नश्राद्धविचारः
२६ आमश्राद्धं
२६ हिरण्यश्राद्धं
२६ घटश्राद्धं


" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

२६ पिंडद्रव्यनिर्णयः
२७ पिंडपरिमाणविचारः
२७ अवांतरतीर्थप्राप्तौश्राद्धविचारः
२७ कुशावर्ततीर्थश्राद्धविचारः
२७ अरुणावरुणासंगमश्राद्धं
२७ श्राद्धसंपातेनिर्णयः
२८ दशमासानंतरंपुनःश्राद्धं
२८ जीवत्पितृकश्राद्धनिर्णयः
२८ कृतबदरिकाश्राद्धेनापिपिंडदानंकार्यं
२९ साग्निकस्याग्नौकरणनिर्णयः
२९ भ्रातृणांविभक्तत्वेश्राद्धनिर्णयः
२९ श्राद्धदेवताविचारः
३० विधवाकर्तृकश्राद्धदेवतानिर्णयः
३० परप्रेरितस्यतीर्थप्राप्तौश्राद्धं
३० अस्थिनिक्षेपविधिः
३१ अस्थिनिक्षेपेदक्षिणादानं
३१ अस्थिनिक्षेपांगदानानि
३१ अस्थिविलयतीर्थेअस्थिनिक्षेपः
३१ त्रिपिंडीविधिः
३१ नागनारायणबलिनिर्णयः
३१ एकवस्त्रस्नानविधिः
३२ गोदाबृहस्पतिपूजानिर्णयः
३३ तीर्थेब्राह्मणभोजनं
३३ गृहगमनोत्तरंगोदापूजाब्राह्मणभोजनावश्यकत्वं
३४ ग्रंथसमाप्तिः


इत्यनुक्रमणिका.



" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# श्रीगोदा प्रसन्नास्तु.

## प्रस्तावना.

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

या ग्रंथाचे कर्ते विद्वद्वर्य वेदशास्त्रसंपन्न रा० रा० हरिशास्त्री गर्गे राहणार पंचवटी हे असून त्यांणीं या ग्रंथास "श्रीगोदानिर्णयचंद्रिका" असें नांव दिलें आहे. यांत श्रीगोदानिमित्तकयात्राविधि व यात्राक्रम यांविषयीं सशास्त्र निर्णय केला आहे, हें या ग्रंथाचे नांवावरून बहुतेकांचे लक्षांत सहज येईलच.

हा ग्रंथ रचण्याचा हेतु असा आहे कीं, या चतुर्युगप्रसिद्ध पुण्यद व पवित्र श्रीनासिक त्र्यंबकक्षेत्रांत लक्षावधि यात्रेकरू यात्रोद्देशानें नेहमीं येतात. येथें यात्रानिमित्तक काय विधान सशास्त्ररीत्या केलें पाहिजे, व यात्राक्रम कसा आहे याविषयीं प्राचीन जगप्रसिद्ध व सर्वमान्य महर्षि व अनेक विद्वज्जन यांनीं बहुत ग्रंथांत भिन्न भिन्न स्थळीं पुष्कळ विवेचन केलें आहे; परंतु एतत्संबंधीं एखादा निर्णायक स्वतंत्र निबंध आजपर्यंत कोणींच लिहिला नसल्यानें बहुत जनांस

नेहमीं अडचण पडत असे. अलीकडे थोडे वर्षांपूर्वीं वे० शा० सं० रामभट्ट होशिंग यांणीं "तीर्थदर्पण" या नांवाचा एक अत्यल्प ग्रंथ केला आहे; व कैलासवासी वे० शा० रा० बाबाशास्त्री धारणे त्र्यंबककर यांणीं "गोदायात्राविवेकादर्श" या नांवाचा एक ग्रंथ करून छापविला आहे. त्यांत त्रिस्थलीसेतु इत्यादि एतद्विषयक निबंधकारांचा जो हेतु कीं अनेक श्रुतिस्मृतिपुराणोक्तवचनांची निःपक्षपातानें एकवाक्यता करून सर्व लोकांस स्वकीय धर्मशास्त्राचें यथार्थ ज्ञान व्हावें; सर्वविधि यथाशास्त्र घडून लोकांस योग्य पुण्यांश प्राप्त व्हावा वगैरे तो स्तुत्य हेतु एकीकडेस ठेवून, सदरील वे० शा० सं० रा० रा० होसिंगशास्त्री व धारणेशास्त्री यांनीं सशास्त्रतेस पराङ्मुख होऊन, केवळ अल्प दृष्टीनें कित्येक मनःकल्पित, व कित्येक अप्रासंगिक शास्त्रार्थ आपापले ग्रंथांत लिहून ठेविले आहेत. यामुळें भाविक यात्रेकरूंस खरा शास्त्रार्थ न कळतां शास्त्रविरुद्ध कृत्यें हातून घडण्याचा प्रसंग येतो हें योग्य नव्हे.

सर्व लोकांस शास्त्राचें यथार्थ ज्ञान होऊन सर्व विधि शास्त्रोक्त रीतीनें घडून यात्राक्रम सविधि साधावा ह्मणून वेदशास्त्रसं० रा० रा० हरिशास्त्री गर्गे यांची बहुत प्रकारें विनंती केल्यावरून त्यांणीं या कामीं फार परिश्रम करून व आपला अत्यंत अमूल्य वेळ खर्चून त्रिस्थलीसेत्वादि अनेक महानिबंधांतील शास्त्रार्थांचे अभिप्रायास अनुकूल असा हा "श्रीगोदानिर्णयचंद्रिका" नामक ग्रंथ परोपकारबुद्धीनें तयार केला आहे. या ग्रंथाची सशास्त्रता, साधारत्व व प्रामाणि-



" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(5अ)

कपणा याविषयींचें परीक्षण विद्वज्जन करितीलच. या ग्रंथाचे अवलोकनानें सर्व यात्रेकरूंचा व्यामोह दूर होऊन श्रीगोदायात्राविधि व यात्राक्रम कसा करावा याविषयीं सर्वांस सुलभ ज्ञान होऊन मोठा उपयोग होईल अशी आशा आहे.

सदरहु ग्रंथ सन १८६७ च्या २५ व्या आक्टाप्रमाणें रजिष्टर करून भाषांतराचे वगैरे सर्व हक्क ग्रंथकर्त्यांनें आपणाकडे ठेविले आहेत.

आश्विनशुद्ध १ शके १८१८.
दुर्मुखनामसंवत्सरे
नासिक.

रघुनाथ तात्या गायधनी.
अण्णाशास्त्री वारे.
गोविंद आबाजी शौचे.
गंगाधर काका गायधनी.
श्रीधरशास्त्री सिन्नरकर.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(6)

श्रीगणेशायनमः ॥ श्रीमज्जगदंबायैनमः ॥ श्रीगुरुभ्योनमः ॥ नत्वाविघ्नाद्रिहं तारंजानकीशंचगौतमीं ॥ त्रिस्थलीसेतुमुख्यांश्चग्रंथानालोच्ययत्नतः ॥ १ ॥ पूतेगर्गकुलांभोधौजनिर्यस्यसुधीर्हरिः ॥ कुरुतेयात्रिकमुदेगोदानिर्णयचंद्रिकां ॥ तत्रतावद्धर्मार्थकाममोक्षाख्याश्चत्वारःपुरुषार्थाःप्राणिनांसेव्यत्वेनप्रसिद्धाः ॥ तदुक्तंमहाभारते ॥ धर्मंचार्थंचकामंचयथावद्वदतांवर ॥ विभज्यकालेकालज्ञःसर्वान् सेवेतपंडितः ॥ मोक्षोवापरमंश्रेयएषांराजन्सुखार्थिनामिति ॥ एतेषुचतुर्षुपुरुषार्थेषुपुरुषार्थांतरसाधकत्वात्परमपुरुषार्थत्वंधर्मस्यैव ॥ तदुक्तंत्रिस्थलीसेतौस्कांदकौर्मयोः ॥ धर्मात्सुखंचज्ञानंचयस्मादक्षयमाप्नुयात् ॥ तस्मात्सर्वंपरित्यज्यविद्वान्धर्मंसमाचरेत् ॥ धर्मात्संजायतेह्यर्थो ॥ धर्मात्कामोभिजायते ॥ धर्मादेवपरंब्रह्म तस्माद्धर्मंसमाचरेदिति ॥ सचधर्मोयज्ञदानाष्टांगयोगसमाधिकृच्छ्रचांद्रायणादिव्रतजपतपस्तीर्थयात्रातीर्थसेवनोपोषणादिभेदाद्बहुविधः ॥ तत्रतीर्थयात्रेतरेषांब

१ अन्य. २ मुख्य.

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7)



हुद्रव्यसाध्यत्वात्केषांचित्सपत्नीकत्वादिबहुगुणसाध्यत्वात्केषांचिच्छरीरकष्टसाध्य
त्वात्तीर्थयात्राया यज्ञाधिकफलवत्त्वादिबहुगुणवत्त्वाच्चतीर्थयात्रैवधर्मःप्रधानं ॥
तदुक्तंमात्स्यभारतयोः ॥ योदरिद्रैरपिविधिःशक्यःप्राप्तुंजनेश्वर ॥ तुल्योयज्ञफ
लैःपुण्यैस्तंनिबोधमहीपते ॥ ऋषीणांपरमंगुह्यमिदंभारतसत्तम ॥ तीर्थाभिगमनं
पुण्यंयज्ञैरपिविशिष्यते ॥ अनुपोष्यत्रिरात्राणितीर्थान्यनभिगम्यच ॥ अदत्वा
कांचनंगाश्चदरिद्रोनामजायतइति ॥ इतितीर्थयात्राकर्तव्यत्वनिरूपणं ॥ अथ
सामान्यतस्तीर्थप्रशंसा ॥ गरुडपुराणे ॥ पुत्रद्रव्यादिसंत्यज्यतीर्थं[1]व्रजतियोनरः ॥
ब्रह्माद्यादेवतातस्यतुष्टिंपुष्टिंददातिहि ॥ कौर्मे ॥ यत्रस्नानंजपोहोमःश्राद्धदाना
दिकंकृतं ॥ एकैकशोमुनिश्रेष्ठाःपुनात्यासप्तमंकुलं ॥ भारतमात्स्ययोः ॥ अग्निष्टो
मादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः ॥ नतत्फलमवाप्नोतितीर्थाभिगमनेनयत् ॥ तथा ॥
अज्ञानेनापियस्येहतीर्थयात्रादिकंभवेत् ॥ सर्वकामसमृद्धःस्यात्स्वर्गेलोकेमहीयत

१ गच्छति.



" Joint project of The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

इत्यादिवचनैस्तीर्थाधिकरणकजपानुष्ठानश्राद्धदानादेरासप्तमकुलोद्धारकत्वोक्ते स्तीर्थयात्राकर्तुर्यज्ञाधिकमहाफलप्राप्तिकथनात्तीर्थमहिमाज्ञानवतोपिस्वर्गादिप्राप्तिप्रतिपादनाच्चतीर्थयात्रादिकमतिप्रशस्ततरं ॥ अथतीर्थभेदाः ॥ तीर्थानिदैवासुरार्षमानुषत्रिदेवतभेदात्पंचविधानि ॥ तत्राद्यानिप्राणिनांपापापनुत्तयेपुण्यादिसमृद्ध्यर्थंचदेवासुरमुनिमनुष्यैरनुकंपयानिर्मितत्वादिनायथाक्रमंदैवासुरादिसंज्ञांलभंते ॥ अंत्यंतुब्रह्मविष्णुरुद्रसंबंधेनोत्पन्नत्वात्त्रिदेवतमिति ॥ तदुक्तंब्रह्मपुराणे ॥ चतुर्विधानितीर्थानिस्वर्गेमर्त्येरसातले ॥ दैवानिमुनिशार्दूलआसुराण्यार्षकाणिच ॥ मानुष्याणिचलोकेषुविख्यातानिसुरादिभिः ॥ ब्रह्मविष्णुशिवैर्देवैर्निर्मितंदैवमुच्यते ॥ त्रिभ्योयदेकंजायेततस्मान्नातःपरंविदुरिति ॥ अथगोदायास्त्रिदेवताकत्वमुच्यते ॥ तस्योपपत्तिश्चेत्थं॥ शिवपार्वत्योर्विवाहकालेपार्वतीसौंदर्यसंदर्शनेनब्रह्मणः कामबाणविद्धस्यरेतःस्खलनेसतितस्यशुद्धयेशिवेनोदकसारंसंगृह्याभिमंत्र्यकमंड

---

१ ऋषिनिर्मित.

लुस्थंचकृत्वातस्मैब्रह्मणेप्रदत्तमितीतिहासोब्राह्मेगोदामाहात्म्येस्पष्टः॥ तदुदकंब्रह्म
णात्रिविक्रमावतारसमयेविष्णोश्चरणकमलेऽर्घ्यत्वेनसमर्पितं ॥ तन्मेरोःसकाशाद्भु
विचतुर्दिक्षुपतितं॥ तन्मध्येदक्षिणदिक्स्थंगंगासंज्ञकंश्रीशिवोजटाजूटेदधार॥ तदु
दकस्यैकोंशस्तपसालब्धशिवप्रसादेनगौतममहर्षिणालोकोपकारायभूमावानीतः
तस्यकालश्चोक्तःस्कांदे ॥गतेकृते[1]द्विलक्षेवैमांधातृचक्रवर्तिनि ॥ धाताब्देकच्छे[2]पज
नौतथासिंहगतेगुरौ॥ माघशुक्लदशम्यांचमध्याह्नेसौम्यवासरे ॥ गंगासमागताभू
मौगौतमप्रार्थितासती ॥ महापापादियुक्तानांजनानांपावनायच ॥ उदुंबरतरो
र्मूलेययौप्रत्यक्षतांतदेति ॥ अपरोंशश्चक्षात्रियेणभगीरथेनानीतइतितस्यक्रमेणगौ
तमीभागीरथीतिव्यवहारः॥ एवंचतयोर्गौतमीभागीरथ्योरेकप्रकृतिकत्वं ॥ तदुक्तं
ब्राह्मेब्रह्मनारदसंवादे ॥ महेश्वरजटास्थायाआपोदेव्योमहामते ॥ तासांचद्विविधो
भेदआहर्तुःपदकारणात् ॥ एकोंशोब्राह्मणेनात्रव्रतदानसमाधिना ॥ गौतमेन

१ सत्ययुगे. २ कूर्मावतारे.



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

शिवंपूज्यआहृतोलोकविश्रुतः ॥ अपरस्तुमहाप्राज्ञक्षत्रियेणबलीयसा ॥ आराध्य शंकरंदेवंतपोभिर्नियमैस्तथा ॥ भगीरथेनभूपेनआहृतोंशोपरस्तथा ॥ एवंद्वैरूप्यमभवद्गंगायागांगतायतइति ॥ स्कांदेस्कंदशंकरसंवादेपि ॥ आदायगौतमोगंगांशुचिःप्रयतमानसः ॥ पूजितोदेवगंधर्वैस्तथागिरिनिवासिभिरित्युपक्रम्य गोदोत्पत्तिमुक्त्वाभागीरथ्युत्पत्तिप्रश्नानुरोधेनतदितिहासंचोक्त्वाऽग्रेउपसंहृतं ॥ महेश्वरजटावारिएवंद्वैविध्यमागतं ॥ विंध्यस्यदक्षिणेगंगागौतमीयानिगद्यते ॥ उत्तरेसापिविंध्यस्यभागीरथ्यभिधीयतइति ॥ एवंचदेवतात्रयसंबंधस्यस्फुटप्रतिपादनाद्गोदायास्त्रिदेवताकत्वंसिद्धमितिदिक् ॥ अथत्रिदेवतगोदाप्रशंसावाक्यानि ॥ ब्रह्मपुराणे ॥ त्रिदैवत्यंतुयत्तीर्थंसर्वेभ्योह्युत्तमोत्तमं ॥ तावदन्यान्तितीर्थानितावत्ताःपुण्यभूमयः ॥ तावद्यज्ञादयोयावत्त्रिदैवत्यंनदृश्यते ॥ ब्रह्मपुराणएवगौतमीप्रादुर्भावसमयेशंकरंप्रतिगौतममहर्षिवाक्यं ॥ ब्रह्महत्यादिपापानिमनोवाक्कायि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कानितु ॥ स्नानमात्रेणसर्वाणिविलयंयांतुशंकर ॥ चंद्रसूर्योप[1]रागेचअयनेविषुवे
तथा ॥ संक्रांतौवैधृतौपातेतीर्थेष्वन्येषुयत्फलं ॥ अस्यास्तुस्मरणादेवतत्पुण्यंजाय
तांहर ॥ एकतःसर्वतीर्थानिस्वर्गेमर्त्येरसातले ॥ एषातेभ्योविशिष्टास्तुअलंशंभोन
मोस्तुते ॥ तद्गौतमवचःश्रुत्वातथास्त्वित्यब्रवीच्छिवः ॥ अस्याःपरतरंतीर्थनभूतं
नभविष्यति ॥ सत्यंसत्यंपुनःसत्यंवेदेचपरिनिष्ठितम् ॥ सर्वेषांगौतमीपुण्यातीर्था
नांमुनिसत्तम ॥ इत्युक्त्वांतरधीयीतगंगांदत्वाजटास्थितामिति ॥ ब्रह्मपुराणएवा
न्यत्र ॥ पंचानामपिभू[2]तोनामापः श्रेष्ठतमामताः ॥ तत्रापितीर्थभूतास्तुतस्मादापः
पराःस्मृताः ॥ तासांभागीरथीश्रेष्ठातस्यायागौतमत्वया ॥ आनीतासातदागंगा
अस्यानान्यच्छुभावहं ॥ स्वर्गेभुवितलेवापितीर्थंबहुगुणोदयं ॥ सधन्यदेशोमंतव्यो
यत्रगोदावरीनदी ॥ पृथिव्यामपिकृत्स्नायांसप्रदेशोतिपावनइति ॥ अनेनसर्वदा
गोदायात्रास्नानादेःब्रह्महत्यादिपापनाशकर्तृत्वंसर्वतीर्थाधिकफलदत्वंचोक्तंभव



१ ग्रहणे. २ पृथिव्यादीनां.

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(9A)

ति ॥ सिंहस्थेसुरगुरौत्वतिविशेषउक्तस्तीर्थदर्पणादौ ॥ स्कांदे ॥ यस्यांतिथौमृगेंद्रे
णयुक्तोदेवगुरुर्भवेत् ॥ तस्यांतुगौतमीस्नानंकोटिजन्माघनाशनं ॥ ब्रह्मांडपुराणे ॥
तीर्थानिनद्यश्चतथासमुद्राःक्षेत्राण्यरण्यानितथाश्रमाश्च ॥ वसंतिसर्वाणिचवर्षमेकं
गोदातटेसिंहगतेसुरेज्ये[2] ॥ स्कांदे ॥ षष्टिवर्षसहस्राणिभागीरथ्यवगाहनं ॥ सकृद्गो
दावरीस्नानंसिंहस्थेचबृहस्पतौ ॥ पाद्मे ॥ उल्लंघ्यगौतमींगंगांतीर्थान्यन्यानिसेवते ॥
सिंहस्थितेसुरगुरौसयातिनरकंध्रुवं ॥ मर्त्यलोकेसमुत्पन्नोनकुर्यात्सिंहगेगुरौ ॥ गौ
तमीस्नानमात्रंतुसजीवन्मृतउच्यते ॥ गंगायांयोजनेपुण्यंसंगमेद्विगुणंस्मृतं ॥ च
तुर्गुणंतुसिंहस्थेह्यतिचारेतुषड्गुणं ॥ वक्रेचाष्टगुणंप्रोक्तंस्नानदानजपादिषु ॥ वाम
नपुराणेपि ॥ यदासिंहेगुरुर्यातिदेवाश्चेंद्रपुरोगमाः ॥ वापीकूपतडागाश्चसुश्वेताः
पल्वलाअपि ॥ वर्षमेकंहितिष्ठंतिमज्जंतिचदिनेदिने ॥ ब्रह्मवैवर्ते ॥ अश्वमेधफलं
चैवलक्षगोदानजंफलं ॥ प्राप्नोतिस्नानमात्रेणगोदायांसिंहगेगुराविति ॥ एवंचगो

१ सिंहेन. २ बृहस्पतौ.

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१०)



दाधिकरणकसर्वतीर्थदेवतावासहेतुकान्यतीर्थयात्रानिषेधस्य-सकृत्स्नानमात्रेणष
ष्टिवर्षसहस्रकालभागीरथीस्नानजस्याश्वमेधलक्षगोदानजस्यचफलस्योक्तत्वेनसिं
हस्थेसुरगुरौगोदायात्रादेरतिश्रेयस्कारित्वंसिध्यति ॥ किंचगोदायागंगापदवा
च्यत्वंचध्वनितंभवति ॥ अतएव-गोदावरीमहिमवर्णनपर-व्रतोपवासकृच्छ्रेभ्योगं
गासेवामहाफलेतिब्रह्मपुराणवाक्यस्थगंगापदेनगौतमीग्रहणंसंगच्छते ॥ किंचगौ
तमीभागीरथ्योःस्कांदब्राह्मवाक्यप्रतिपादितैकात्मकप्रकृतित्वमेतद्ग्रंथस्थेगोदायास्त्रि
देवतासंबंधप्रतिपादकप्रकरणेप्राग्युक्तंनविस्मर्तव्यम् ॥ एतेनभागीरथ्याएवगंगाप
दव्यपदेशइत्युक्तिःपरास्ता ॥ अतएव-गंगेयंसरितांश्रेष्ठासर्वकामप्रदायिनीतिस्कां
दवाक्येकाशीखंडस्थ-कृतेसर्वत्रतीर्थानित्रेतायांपुष्करंपरं ॥ द्वापरेतुकुरुक्षेत्रंकलौगं
गैवकेवलमितिवाक्येचोभयोर्ग्रहणंसिध्यतीतिदिक् ॥ अथयात्राधिकारिनिर्णयः
महाभारते ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवाराजसत्तम ॥ नवियोनिंव्रजंत्येतेस्नाता

१ व्यवहारः.

तीर्थेमहात्मनइतिवाक्यात्ब्राह्मणादिचातुर्वर्ण्यस्याधिकारः ॥ गृहस्थस्यतु—पूतांपु
ण्यतमांभार्यांयोवात्यक्त्वाप्रयातिहि ॥ तस्यपुण्यफलंसर्वंवृथाभवतिनान्यथा ॥ प्रा
यश्चित्तीव्रजेत्तीर्थंपत्नीविरहितोपिवेतिब्राह्मादप्रायश्चित्तिनःपत्न्यासहैवाधिकारः॥
प्रायश्चित्तार्थतीर्थगमनेतुपत्नीरहितस्यैव ॥ अकृतप्रायश्चित्तस्यसंसर्गनिषेधात् ॥
साग्निनिरग्निसाधारणोयंनियमः ॥ सहाग्निर्वासपत्नीकोगच्छेत्तीर्थानिसंयुतः ॥ स
र्वपापविनिर्मुक्तोयथोक्तांगतिमाप्नुयादितिकौर्मात् ॥ निरग्निकस्यत्वपत्नीकस्याप्य
धिकारइतिधर्माब्धिः ॥ नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं ॥ पतिंसंसेवतेया
तुतेनस्वर्गेमहीयते ॥ बाल्ययावायुवत्यावावृद्धयावापियोषिता ॥ नस्वातंत्र्येणक
र्तव्यंकिंचित्कार्यंगृहेष्वपीतिमनुवचनाभ्यां-सधवायाःपत्यासहैव ॥ विधवायास्तु
पुत्राद्यनुमत्यैवेतिशम् ॥ अथतीर्थफलतारतम्यकारणानि ॥ तीर्थेंदुशेखरेमात्स्ये ॥
गोयानेगोवधःप्रोक्तोहययानेतुनिष्फलं ॥ नरयानेतदर्धंस्यात्पद्भ्यांतत्स्याच्चतुर्गु
णं ॥ संपूर्णमित्यर्थश्चतुर्गुणपदस्येतित्रिस्थलीसेतुः ॥ अयंगोयानेगोवधकथनेन

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11)



प्रतीयमानोगोयानादिनिषेधो न्यूनफलप्राप्तिकथनंचपादगमनसमर्थस्यैव ॥ अतएव-असमर्थस्तुयानेनतीर्थयात्रांसमाचरेत् ॥ तदुक्तंफलमाप्नोतिस्वशक्त्याधर्ममाचरन्निातित्रिस्थलीसेतुधृतगोभिलवचनंसंगच्छते ॥ तथाचपद्भ्यांतीर्थगमनमतिश्रेयस्कृत् ॥ अर्धफलकथनान्नरवाहनेमध्यमं ॥ गोहयादियानंत्वधमं ॥ आधुनिकराजज्ञातीयनिर्मिताग्निशकटेनगमनंतुपादगमनापेक्षयान्यूनफलकंगोयानाद्यपेक्षयाऽधिकफलकमितिप्रतिभाति ॥ वाणिज्यादिव्यापारहेतुनातीर्थगमनेतुविशेषः ॥ अर्धंतीर्थफलंतस्ययःप्रसंगेनगच्छति ॥ तदेवकूलायानेनस्नानमात्रफलंलभेदिति॥ नतुतीर्थयात्राकृतमितिभावः ॥ अथतीर्थयात्रायांकालनिर्णयः ॥ त्रिस्थलीसेतौ ॥ गोदावर्यांगयायांचश्रीशैलेग्रहणद्वये ॥ सुरासुरगुरूणांचमौढ्यदोषोनविद्यते ॥ अधिमासेचजन्मर्क्षेअस्तेचगुरुशुक्रयोः ॥ तीर्थयात्रानकर्तव्यागयांगोदावरींविना ॥

१ अस्त.



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com